श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७७

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७७

*उपश्लोकोत्पत्तिवर्णनं जरासन्धादियुद्धवर्णनं*
*मुचकुन्दानुग्रहवर्णनं च*

सैरन्ध्र्यास्तदनु चिरं स्मरातुराया
  यातोऽभूः सुलळितमुद्धवेन सार्धम्।
आवासं त्वदुपगमोत्सवं सदैव
  ध्यायन्त्याः प्रतिदिनवाससज्जिकायाः॥ १॥

उपगते त्वयि पूर्णमनोरथां प्रमदसम्भ्रमकम्प्रपयोधराम्।
विविधमाननमादधतीं मुदा रहसि तां रमयाञ्चकृषे सुखम्॥ २॥

पृष्टा वरं पुनरसाववृणोद्वराकी
  भूयस्त्वया सुरतमेव निशान्तरेषु।
सायुज्यमस्त्विति वदेत् बुध एव कामं
  सामीप्यमस्त्वनिशमित्यपि नाब्रवीत् किम्॥ ३॥

ततो भवान् देव निशासु कासुचिन्मृगीदृशं तां निभृतं विनोदयन्।
अदादुपश्लोक इति श्रुतं सुतं स नारदात् सात्वततन्त्रविद् बभौ॥ ४॥

अक्रूरमन्दिरमितोऽथ बलोद्धवाभ्यामभ्यर्चितो बहु नुतो मुदितेन तेन।
एनं विसृज्य विपिनागतपाण्डवेयवृत्तं विवेदिथ तथा धृतराष्ट्रचेष्टाम्॥ ५॥

विघातज्जामातुः परमसुहृदो भोजनृपते-
  र्जरासन्धे रुन्धत्यनवधिरुषान्धेऽथ मथुराम्।
रथाद्यैर्द्योर्लब्धैः कतिपयबलस्त्वं बलयुत-
  स्त्रयोविंशत्यक्षौहिणि तदुपनीतं समहृथाः॥ ६॥

बद्धं बलादथ बलेन बलोत्तरं त्वं
भूयो बलोद्यमरसेन मुमोचिथैनम्।
निश्शेषदिग्जयसमाहृतविश्वसैन्यात्
कोऽन्यस्ततो हि बलपौरुषवांस्तदानीम्॥ ७॥

भग्नः स लग्नहृदयोऽपि नृपैः प्रणुन्नो
युद्धं त्वया व्यधित षोडशकृत्व एवम्।
अक्षौहिणीः शिव शिवास्य जघन्थ विष्णो
सम्भूय सैकनवतित्रिशतं तदानीम्॥ ८॥

अष्टादशेऽस्य समरे समुपेयुषि त्वं
दृष्ट्वा पुरोऽथ यवनं यवनत्रिकोट्या।
त्वष्ट्रा विधाप्य पुरमाशु पयोधिमध्ये
तत्राऽथ योगबलतः स्वजनाननैषीः॥ ९॥

पद्भ्यां त्वं पद्ममाली चकित इव पुरान्निर्गतो धावमानो
म्लेच्छेशेनानुयातो वधसुकृतविहीनेन शैले न्यलैषीः।
सुप्तेनांघ्र्याहतेन द्रुतमथ मुचुकुन्देन भस्मीकृतेऽस्मिन्
भूपायास्मै गुहान्ते सुललितवपुषा तस्थिषे भक्तिभाजे॥ १०॥

ऐक्ष्वाकोऽहं विरक्तोऽस्म्यखिलनृपसुखे त्वत्प्रसादैककाङ्क्षी
हा देवेति स्तुवन्तं वरविततिषु तं निस्पृहं वीक्ष्य हृष्यन्।
मुक्तेस्तुल्यां च भक्तिं धुतसकलमलां मोक्षमप्याशु दत्वा
कार्यं हिंसाविशुध्यै तप इति च तदा प्रात्थ लोकप्रतीत्यै॥ ११॥

तदनु मथुरां गत्वा हत्वा चमूं यवनाहृतां
मगधपतिना मार्गे सैन्यैः पुरेव निवारितः।
चरमविजयं दर्पायास्मै प्रदाय पलायितो
जलधिनगरीं यातो वातालयेश्वर पाहि माम्॥ १२॥

★★★★★★★★★★